# कणादरहस्ये प्रतिपादितदिग्द्रव्यसमीक्षणम्

**मुनीशकुमारमिश्रः**
**शोधच्छात्रः, वैदिकदर्शनविभागः**
**काशीहिन्दूविश्वविद्यालयः**

महर्षिणा कणादेन **''इत इदम् (दूरं सन्निकटं वा) इति यतः तद्दिश्यं लिङ्गम्''**[1] इति सूत्रेण दिक्सिद्धिः कृता। दिक्कालविपरीता भवति, यतोहि काले कालिकपरत्वापरत्वे वर्तेते किन्तु दिशि दैशिकपरत्वापरत्वे वर्तेते, अतः कालविपरीतपरत्वापरत्वानुमेया दिक्। यथोक्तं तर्कभाषाकारेण- **''कालविपरीतपरत्वानुमेया दिक्''।**[2] विश्वनाथकौण्डभट्टाभ्यां[3] प्रतिपादिलक्षणयोरपि उक्तलक्षणेन सह साम्यं दृश्यते, किन्तु तर्कसंग्रहकारेण **''प्राच्यादिव्यवहारहेतुर्दिक्''**[4] इति प्रतिपादितम्। उदयनाचार्येण एतद्भिन्नं विशिष्टं लक्षणं प्रतिपादितम्।[5] शङ्करमिश्रेण कणादरहस्ये उपस्कारे चैतदभिन्नानि अनेकानि लक्षणानि प्रतिपादितानि। यथा-

**१.स्पन्दविषयकापेक्षाबुद्धिजन्यपरत्वापरत्वासमवायिकारणसंयोगानाश्रयत्वे सति विशेषगुणासमानाधिकरणमहत्त्वाश्रयत्वम्-** क्रियाविशेषं स्पन्दमुच्यते। तथा चानेकस्पन्द-विषयकं ज्ञानमपेक्षाबुद्धिः कथ्यते। यस्मात् परत्वापरत्वयोरुत्पत्तिर्भवति। परत्वापरत्वे प्रति पिण्डविशेषसंयोगोऽसमवायिकारणं भवति, तत्संयोगाश्रयो कालः, अनाश्रया दिशा भवति। तत्प्रकारकविशेषगुणाश्रयाः पृथिव्यप्तेजोवाय्वाकाशात्मानः भवन्ति। तेष्वाकाशात्मनो महत्त्वं वर्तते, दिक्कालवृत्तिमहत्त्वं विशेषगुणासमवायिकारणं भवति, यतोहि तयोः विशेषगुणाभावः। तन्महत्त्वाश्रयं यद्यपि कालोऽपि स्यात् किन्तु स्पन्दविषयकापेक्षाबुद्धिजन्यत्वविशेषणस्य कालेऽघटितत्वात् दिङ्मात्रे लक्षणस्य समन्वयः।

**२. संयोगविषयकापेक्षाबुद्धिजन्यपरत्वापरत्वासमवायिकारणसंयोगाधिकरणत्वे सति मूर्त्त्यनधिकरणत्वम्-** स्पन्दमिव संयोगविषयकापेक्षाबुद्ध्याऽपि परत्वापरत्वयोरुत्पत्तिः, किन्तु तं प्रति पिण्डविशेषसंयोगोऽसमवायिकारणम्। तदधिकरणं यद्यपि दिक्पिण्डोभयौ स्यातां किन्तु पिण्डविशेषः मूर्त्तत्वस्याधिकरणमेव भवति, मूर्त्तत्वानधिकरणता उपर्युक्तविशेषणं दिङ्मात्रे एव विद्यते, अतः दिशि लक्षणसमन्वयः।

**३. कालान्यत्वे सति विशेषगुणासमानाधिकरणसंयोगाधिकरणमूर्तत्वम्-** संयोगं नवद्रव्यवृत्तिः स्वीकृतं किन्तु विशेषगुणासमानाधिकरणसंयोगाश्रयाणि त्रीण्येव द्रव्याणि सन्ति,

कालदिक्मनांसि च। उक्तत्रयेषु काले 'कालान्यत्वं' विशेषणं नास्ति, तथा च मनसि 'अमूर्तत्वं' नास्ति। अत: परिशेषात् दिशिमात्रे लक्षणस्य समन्वय:।

**४. महत्त्वाश्रयत्वे सति विशेषगुणासमानाधिकरणसंयोगाधिकरणत्वे सति स्पन्दगोचरापरापेक्षाबुद्धिजन्यपरत्वासमवायिकारणसंयोगानधिकरणत्वम्-** उपर्युक्तरीत्यैव विशेषगुणासमवायिकारणसंयोगाश्रयाणि त्रीणि द्रव्याणि भवन्ति, दिक्कालमनांसि च। प्रस्तुतलक्षणे मनसि अतिव्याप्तिवारणाय महत्त्वाश्रयत्वं विशेषणमुपात्तम्। वैशेषिकमते मनसोऽणु परिमाणं भवति। यद्यपि महत्वाश्रय: कालोऽपि स्यात् किन्तु तत्परिहारार्थं लक्षणे तृतीयं विशेषणमुपात्तम्। तदनुसारं स्पन्दविषयकापेक्षाबुद्धिजन्यपरत्वासमवायिकारणसंयोगस्य (कालपिण्डसंयोगस्य) अधिकरणताया: दिशामात्रे सत्त्वाद्भवति लक्षणसमन्वय:।

५. **विशेषगुणाधिकरणानधिकरणमहत्त्वाधिकरणत्वे सति कालप्रतियोगिकान्योन्याभावाधिकरणत्वम्-** महत्परिमाणम् आकाशकालदिगाात्मवृत्तित्वम्। एताषु आकाशात्मानौ च विशेषगुणाश्रयौ भवत:। फलत: विशेषगुणानधिकरणवृत्तिमहत्परिमाणाश्रयौ द्वौ द्रव्यौ दिक्कालौ एव भवत:, किन्तु काले कालभेदस्यासत्त्वादुक्तलक्षणस्य दिशामात्रे समन्वय:। आकाशात्मनोरतिव्याप्तिवारणाय विशेषगुणानधिकरणत्वस्य निवेश:, तथा च कालेऽतिव्याप्तिवारणाय कालप्रतियोगिकान्योन्याभावाधिकरणत्वस्य लक्षणे निवेश:।

**६. विशेषगुणत्वावच्छिन्नप्रतियोगिकात्यन्ताभावसमानाधिकरणकालप्रतियोगिकान्योन्याभावसमानाधिकरणमहत्त्वाधिकरणत्वम्-** अर्थात् विशेषगुणाभावाधिकरणत्वे सति कालभेदाधिकरणत्वे सति यत्महत्त्वाश्रयं भवति, तदेव दिगुच्यते। विशेषगुणाभावाधिकरणत्वे सति महत्त्वाधिकरणं कालोऽपि भवति, अत: तत्रातिव्याप्तिवारणाय कालप्रतियोगिकान्योन्याभावसमानाधिकरणत्वस्य निवेश:। कालभेदाधिकरणत्वे सति महत्त्वाश्रयमाकाशं पृथिव्यादयोऽपि भवन्ति, अत: तद्व्यावृत्त्यर्थं विशेषगुणत्वावच्छिन्नप्रतियोगिकात्यन्ताभाव-समानाधिकरणत्वं विशेषणमुपात्तम्। विशेषगुणाभावाधिकरणत्वे सति कालभेदाधिकरणा: गुणादयोऽपि भवन्ति, अत: तद्व्याव्यावृत्त्यर्थं महत्त्वाधिकरणत्वस्य लक्षणे निवेश:। गुणे गुणाऽनङ्गीकारात् महत्त्वाधिकरणं गुणा: न भवन्ति। यद्यपि द्रव्यत्वस्य निवेशादपि उक्तदोषस्य वारणं कर्तुं शक्यते तथापि मनसि अतिव्याप्तिवारणाय महत्त्वाधिकरणत्वस्य निवेश: आवश्यक:। मनसि विशेषगुणं न स्वीक्रियते। अत्राऽणुभिन्नं परिमाणं महत्परिमाणस्य तात्पर्यमस्ति न तु परममहत्परिमाणम्, यतोहि तावत्प्रकारकनिवेशस्य न किमपि प्रयोजनम्। मध्यमपरिमाणवत् किमपि द्रव्यं विशेषगुणाभावाधिकरणं न भवितुं शक्यते। यद्यपि रूपादीनां यकिञ्चिद्विशेषगुणाभावो वाय्वादिमध्यमपरिमाणवद्द्रव्ये विद्यते, तथात्रापि कालभेदमहत्परिमाणयो: विद्यमानत्वाददतिव्याप्ते:

सम्भावनाऽस्ति, तथापि विशेषगुणाभावस्य विशेषगुणसामान्याभावरूपे निवेशे उक्ताऽतिव्याप्तेः वारणं जायते। यतोहि वायौ स्पर्शरूपविशेषगुणसत्त्वात् विशेषगुणसामान्याभावो न वर्तते। एतदभिप्रायेणैव ग्रन्थकारेण विशेषगुणत्वावच्छिन्नप्रतियोगिताकाभावं निवेशितम्।

७. **महत्त्वसमानाधिकरणविशेषगुणत्वावच्छिन्नप्रतियोगिकान्योन्याभावाधिकरणत्वे सति स्पन्दगोचरापेक्षाबुद्धिजन्यपरत्वासमवायिकारणसंयोगानाधिकारणत्वम्-** अर्थात् महत्त्वाधिकरणवृत्तिविशेषगुणसामान्याभावाधिकरणत्वे सति यत्स्पन्दविषयका-पेक्षाबुद्ध्या उत्पद्यमानपरत्वासमवायिकारणसंयोगाधिकरणं न भवति तद्दिगुच्यते। यथा पूर्वमुक्तं यत् स्पन्दविषयकापेक्षाबुद्ध्या यत्किञ्चिद्वस्तुनि परत्वोत्पत्तिः तं प्रति दिक्-पिण्डसंयोगोऽसम-वायिकारणं भवति, तदाश्रयता दिशि आयाति।[६] एवञ्चेदमपि कथितमेव यत् महत्त्वाधिकरणत्वे सति दिशा विशेषगुणसामान्याभावाधिकरणमपि भवति।[७] अत उक्तलक्षणस्य दिङ्मात्रे समन्वयः।

८. **विशेषगुणासमानाधिकरणैकत्वाश्रयत्वे सति क्रियानुपनायकं निष्क्रिय-द्रव्यत्वम्-** दिक्कालयोरेव विशेषगुणरहितद्रव्ययोरेकत्वसंख्या भवति। कालः क्रियाऽनुपनायको नास्ति, अपितु क्रियोपनायकं द्रव्यमस्ति। अतः कालेऽतिव्याप्ति वारणाय क्रियाऽनुपनायकत्वस्य निवेशः।

९. **विशेषगुणवन्निष्ठान्योन्याभावप्रतियोगित्वे सति कालमनःसंयोगानधिकरण-द्रव्यत्वम्-** अर्थाद् विशेषगुणाश्रयवृत्तिभेदप्रतियोगित्वे सति यद्द्रव्यं कालमनःसंयोगाधिकरणं न भवति तमेव दिगुच्यते। विशेषगुणाश्रयेषु पृथिव्यप्तेजोवाय्वाकाशात्मसु दिगिव कालमनःभेदोऽपि विद्यते, किन्त्वोभयं कालमनःसंयोगाश्रयमेव भवतः। तेनैव प्रकारेणोक्तद्रव्येषु गुणादिपदार्थानामपि भेदः वर्तते, किन्तु द्रव्यत्वविशेषणोपादानादेव तेषां परिहारः। अतः परिशेषादुक्तलक्षणस्य दिशि समन्वयः।

१०. **प्राचीव्यवहारासाधारणकारणत्वे सति साधारणकारणत्वम्-** प्राचीप्रतीची-त्यादिव्यवहारान् प्रत्यसाधारणकारणत्वे सति यद्द्रव्यं स्वभावतः कार्यमात्रं प्रति साधारणकारणं भवति, तद्दिगुच्यते। इत्थम्प्रकारेण उदीचीत्यादीनां तत्तद्दिग्विशेषणामपि निवेशं कृत्वा उक्तरीत्या लक्षणानां निर्माणं कर्तुं शक्यते।[८]

उपर्युक्तलक्षणानां सम्बन्धे अयमाक्षेपः कर्तुं शक्यते यल्लक्ष्यस्य सिद्धिसत्त्वे एव तेषामसाधारणरूपं धर्मलक्षणं सम्भवति, प्रकृते दिक् नामकः पदार्थ एवाऽप्रसिद्धः, अतः तल्लक्षणकार्यं न समीचीनम्। लक्षणस्य लक्ष्येऽप्रसिद्धिनामकस्य अस्य दोषस्य ग्रन्थकारेण आश्रयासिद्धिशब्देनोल्लेखितम्। आश्रयासिद्धिर्नाम अनुमाने पक्षाऽप्रसिद्धिः। लक्षणेनापि

लक्ष्येतरभेदानुमानं क्रियते। तत्र लक्ष्य: पक्ष:, इतरभेद: साध्य:, लक्षणं हेतु: भवति। एतादृशदशायां लक्ष्याऽप्रसिद्धानुमाने पक्षाऽप्रसिद्धं भवति, अत: ग्रन्थकार आश्रयासिद्धिशब्दस्य प्रयोगं कृतवान्। उक्ताक्षेपस्य समाधाने ग्रन्थकार: कथयति यत् प्राचीप्रतीचीत्यादिव्यवहारेण दिक् नामकद्रव्यस्य सिद्धि:।[९]

यद्वस्त्वपेक्षया दिश: यद्भाग: सूर्योदयसन्निहितो भवति तद्भागे तद्वस्त्वपेक्षया प्राचीदिशाया: व्यवहारो जायते। तथैव यद्वस्त्वपेक्षया दिशा: यद्भाग: सूर्यास्ताचलसन्निहित: भवति तद्भागे तद्वस्त्वपेक्षया प्रतीचीदिग्व्यवहारो जायते। दिश: इदं सन्निधानं संयुक्तसंयोगाल्पीयस्त्वं भवति। यदा कस्मिंश्चिद् वृक्षादावङ्गुल्या पूर्वपश्चिमादि: निर्दिश्यते तदा तद् वृक्षविशेषे उपर्युक्तसंयुक्तसंयोगा: विशेषणरूपेण भासन्ते, येषां केनचिद्विभुद्रव्येण सह सम्बन्धमावश्यकं भवति, यतोहि अविभुद्रव्येषु तदुपनयस्य सामर्थ्यं नास्ति। आकाशात्मानौ यद्यपि विभुद्रव्यं, तथाप्यतिप्रसञ्जकत्वात् संयुक्तसंयोगोपनायकं न भवत:। काल: नियमेन क्रियोपनायकत्वरूपेणैव सिद्ध:, तस्मात् काले संयोगोपनायकत्व-स्वभावान्तरकल्पने पुनरतिप्रसक्ति:। अत: संयुक्तसंयोगोपनायकविभुद्रव्यरूपे दिक्सिद्धि:।[१०]

दिक्सिद्धौ परत्वापरत्वे हेतू भवत:, अस्मिन्सम्बन्धे ग्रन्थकारेण परत्वापरत्वनिरूपणे विशेषविवेचनं कृतम्। दिक्कालयो: सकलप्रमातृसाधारणव्यवहारविशेषणोपनायकत्वेनापि भेदसिद्धिर्जायते। उदाहरणार्थं यथा वर्त्तमानकाल: प्रत्येकव्यक्तिनां कृते समानरूपेण वर्त्तमानकाल एव भवति, किन्तु दिक्सम्बन्धे एतादृशी स्थिति न सम्भवा, यतोहि या दिशा कश्चिद्व्यक्तिकृते प्राची भवति सैव दिशा कश्चिदन्यकृते प्रतीच्यपि भवितुं शक्यते।

स्वरूपत एकत्वेऽपि सूर्यसंयोगाद्युपाधिभेदात् प्राच्यादिव्यवहारेण दिग् दशविधा।[११] शिवादित्यमते एकादशभेदा: सन्ति, यथा- **''दिक्- ऐन्द्री, आग्नेयी, याम्या, नैर्ऋति, वारुणी, वायव्या, कौबेरी, ईशानी, नागी, ब्राह्मी, रौद्री इत्येकादशविधा''।**[१२] शिवादित्यमते 'रौद्री' सर्वेषां दिशां मध्यभागो वर्तते। भाष्यकारेण[१३] रौद्रीदिश: गणना न कृता, तन्मते दिग् दशविधा एव, नैकादशविधा न वा नवविधा। ग्रन्थकारेण प्राच्यादिरूपेण दशोपभेदा: वर्णिता:। दिगोपाधिभेदसाधने प्रशस्तदेवाचार्य: वैदिकं प्रमाणमपि प्रस्तुतम[१४]- यथा पूर्वपश्चिमेत्यादिदिक्साधकलिङ्गानां समानत्वात् तदेकत्वेऽपि परममहर्षिभि: 'न प्रतीची शिरा: शयीत' इत्यादिना वैदिकवाक्येन, 'आयुष्यं प्राङ्मुखो भुंक्ते'' इत्यादिना स्मृतिवाक्येन, 'पूर्वं गच्छ दक्षिणमवलोकय' इत्यादिलोकव्यवहारसिद्धवाक्येन च भेदसिद्धि:। भाष्यमते औपाधिकद्रव्यभेदात् दशसंज्ञा, न तु वास्तविको भेद:। तथा च **''तासामेव देवतापरिग्रहात्**

**पुनर्दश संज्ञा भवन्ति- माहेन्द्री वैश्वानरी याम्या नैर्ऋती वारुणी वायव्या कौबेरी ऐशानी ब्राह्मी नागी चेति''**।[१५]

उदयाचलसन्निहिता या दिक् सा प्राची, अस्ताचलसन्निहिता या दिक् सा प्रतीची, प्रच्याभिमुखस्य पुरुषस्य वामप्रदेशावच्छिन्ना या दिक् सा उदीची, तादृशपुरुषस्य दक्षिणप्रदेशावच्छिन्ना या दिक् आवाची (दक्षिणदिक्)। तत्र वामत्वं दक्षिणत्वञ्च किमिति जिज्ञासायामुच्यते वामत्वं दक्षिणत्वञ्च जातिविशेषः, या शरीरे तिष्ठति। ते तु प्रत्यक्षसिद्धाः। किं नाम अधो दिक्? तदुच्यते- **''गुरुत्वासमवायिकारणकक्रियाशून्यत्वे सति तज्जन्यसंयोगाश्रया दिगधः''**[१६]। तथा च **''अदृष्टवदात्मसंयोगजन्याग्नि-क्रियाशून्य-तज्जन्यसंयोगााश्रया दिगूर्ध्वा''**[१७] इति। द्वयो दिशोऽन्तरालमुभयदिक् नाम्ना व्याह्वियते। यथा-पूर्वदक्षिणा, दक्षिणपश्चिमा, पश्चिमोत्तरा, उत्तरपूर्वेति च। अथवा विपरीतक्रिमेणापि व्यवह्वियते- दक्षिणपूर्वा, पश्चिमदक्षिणा, उत्तरपश्चिमा, पूर्वोत्तरा च।[१८] कणादरहस्ये ग्रन्थकारेण सर्वाषां दिशां स्वरूपं व्याख्यातं किन्त्वन्यत्र सर्वाषां स्वरूपं लक्षणं नोपलभ्यन्ते। दिक्कालौ स्वपूर्वोत्पद्यमानपदार्थोत्पत्तौ निमित्तकारणौ भवतः। इहेदानीं जात इति प्रतीतिबलाद् दिक्कालयो अधिकरणत्वे स्वीकृते या काचित्क्रिसम्पादने अधिकरणमपि कारणं भवति। यथा इहेदानीं जात इति प्रतीतिबलाद् दिक्कालौ कारणौ मन्यते तथैव गेहे जातो, गोष्ठो जात इति प्रतीतिबलाद् गेहगोष्ठयोरपि कारणं कथं न स्यात्? तदुच्यते- **''परं त्वनुगतरूपाभावान्न तथेति ब्रूमः''**[१९]। दिशि पञ्चगुणाः सन्ति, तद्यथा- संख्यापरिमाणपृथक्त्वसंयोगविभागाः। इति दिक्।

---

[१] वै. सू. २.२.१०।
[२] तर्कभाषा, पृ. १८९।
[३] (क) दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते- भा. परि. कारि. ४६।
(ख) दूरत्वमन्तिकत्वञ्च दैषिकं परत्वमपरत्वं बोध्यम्- न्या. सि. मु., पृ.।
(ग) दिगेका नित्या विभ्वी दैशिकपरत्वापरत्वासाधारणकारणम्- त. प्र., पृ. ८३ एवं प. दीप., पृ. ३४।
[४] तर्कसंग्रहः, पृ. ३९।
[५] अनियतपरत्वासमवायिसमवायिनि मूर्तत्वरहिता दिक्- लक्ष., पृ. १४।
[६] प्रथम लक्षणे।
[७] षष्ठलक्षणे।
[८] एवं दिगन्तरप्रक्षेपादूह्यम्- क. र., पृ. १९।
[९] तदेव, १९।
[१०] क. र., पृ. १९।
[११] वै. सू. २.२.१४।
[१२] स. प., पृ. ३९।
[१३] माहेन्द्री, वैश्वानरी, याम्या, नैर्ऋती, वारुणी, वायव्या, कौबेरी, ऐशानी, ब्राह्मी, नागी चेति- प्र. पा. भा., पृ. १६७।
[१४] परममहर्षिभि: श्रुतिस्मृतिलोकव्यवरािर्थम्- प्र. पा. भा., पृ. १६५।
[१५] तदेव, पृ. १६७।

[१६] क. र., पृ. १९।
[१७] क. र., पृ. १९।
[१८] तदेव।
[१९] क. र., पृ. १९।